# “पण्डितप्रवरश्रीबदरिप्रसादशास्त्रिणां” कृतित्वं व्यक्तित्वञ्च

डॉ. प्रमोदकुमारः शर्मा
सहाचार्यः, व्याकरणविभागः
जगद्गुरूरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः,
जयपुरम् (राजस्थानम्)

**राजस्थानवसुन्धरा हि सततं वीरै मुर्दा लालिता,**
**काशी यत्र पराजयं प्रतिगता शास्त्रार्थनिर्धारणे ।**
**तत्र श्रीबदरिप्रसादविदुषां ग्रामे प्रपूर्णाऽभिश्चे,**
**जातं जन्म विशुद्धविप्रभवनेऽहो झुन्झुनूमण्डले ।।१।।**

**पाण्डित्यं नवतामवाप्य च महद् विभ्राजते शास्वतम्,**
**येषामत्र यशोध्वजश्च नितरां दोधूयते-भूतले ।**
**तेषां व्याकरणादिशास्त्रविदुषां साहित्यमालोड्य वै,**
**लेखेऽस्मिन् पुरतो विचार्य भवतां किञ्चिन्मयोल्लिख्यते।।२।।**

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालये महामहोयाध्यायगिरिधरशर्मचतुर्वेद-व्याकरणपीढाध्यक्षाणां विद्यारण्यविहारिणां महामहोपाध्यायकल्पानां परमपूतचरणानां पण्डितप्रवरश्रीबदरिप्रसादशास्त्रिणां संस्कृतसाहित्य- साधनायां विलिखितानां ग्रन्थरत्नानामुल्लेखोऽत्रादौ विधीयते ।‘एतच्चाघस्तादवगन्तव्यं सुधीभिः ।

(१) **प्रथमो ग्रन्थः** ‘श्री गान्धिवादस्वरूपम्’ इति प्रथमे महाकाव्ये सप्तखण्डानि सन्ति । तत्र प्रथमखण्डे गौराङ्गानामागमन समयेऽस्माकं भारतदेशस्य राजनैतिकस्थिति : कीदृशी आसीत् ? तथा समायातेषु च गौराङ्गेषु कीदृशी बभूव इति वर्णितं महाकविना । द्वितीये खण्डे गौराङ्गशासकानां शासनपद्धतिः भारतीयैः सह गौराङ्गानां दुर्व्यवहारः शतशः प्रमाणैरूल्लिखितः । तृतीये खण्डे महात्मनः गान्धि-महाभागस्य जीवनवृत्तमुल्लिखितमस्ति । चतुर्थे खण्डे स्वातन्त्र्यसंग्रामस्य वर्णनमुपलभ्यते । पञ्चमे च खण्डे राष्ट्रियमहासभायाः विभाजनकारणानि तथा षष्ठे खण्डे गान्धिवादस्य स्वरूपनिधारणं

दृश्यते । सप्तमे खण्डे तस्य स्वरूपस्य व्याख्यानं विश्लेषणपुरस्सरं तस्योपयोगित्वं सिद्धिश्च वर्णितास्ति ।(२)**द्वितीयो ग्रन्थः** 'रामजन्मभूमिः इति नाम्ना एकं महाकाव्यमेवास्ति। एतत्महाकाव्य-मैतिहासिकमस्ति । महाकाव्यऽस्मिन् विष्णुमहापुराणानुसारं भारतवर्षास्य सीमा भौगोलिकीस्थितिश्च निरूपिताऽस्ति । इदमपि महाकाव्यं राष्ट्रभक्तिपरिपूर्णं वर्तते । यद्यपि महाकाव्यमेतत् इदानीं यावदापि न प्रकाशिदतमस्ति ।**(३) तृतीयो ग्रन्थः** भक्तिभागीरथ्याः स्तोत्रमस्ति । अस्मिन् काव्ये भक्तिस्वरूपमुल्लेखपुरस्सरभगवतः भक्तस्य च स्वरूपमुल्लिखितमस्ति।**(४) चतुर्थो ग्रन्थः** जगद्गुरूगौरवमिति नामकः काव्यग्रन्थः एव अस्ति। अस्मित्-ग्रन्थे लेखकः स्वात्मनः गुरोः निम्बार्कसम्प्रसादयाचार्यस्यानन्त श्री विभूषितस्य श्री राजासर्वेश्वरसरणदेवाचार्यस्य जगन्मङ्गलकरंपुष्यं चरित्रं प्रस्तौति ।**(५)पञ्चमो ग्रन्थः** 'श्रीमञ्जूनाथीयम्' इति नाम्ना प्रसिद्धो ऽस्ति । कवेरिदं काव्यमस्ति । अस्य काव्यस्य नायकः स्वनामधन्यः देवर्षिः भट्टश्रीमथुरानाथशास्त्रिमहाभागोऽस्ति । काव्येऽस्मिन कविता देवर्षिचरितमादाय तस्य व्यक्तित्वस्य कृतित्वस्य च समीक्षापूर्वकं देवर्षिकृतसंस्कृतसंस्कृतिसेवा सहृदयानां समक्षमानीताऽस्ति ।**(६)षष्ठो ग्रन्थः** 'महात्ममाहिमामृतम्' इत्यस्ति । अस्मिन् ग्रन्थे अनेकेषां विवेकानन्दप्रभृतिमहात्मानां संक्षिप्तं चरितमुल्लिखितमस्ति ।**(७)सप्तमो ग्रन्थः** 'ब्रजवल्लभीयम्' इत्यस्ति, इदमपि चरितकाव्यमेवास्ति । अस्मिन् काव्ये श्रीमन्निम्वार्क-सम्प्रदायस्य वरिष्ठाधिकारिणः महात्मनः वल्लभदासपञ्चतीर्थस्य सुचरितं चित्रितमस्ति ।**(८)अष्टमो ग्रन्थः** 'विहारिविहारः' इत्यस्ति । एतदपि चरितकाव्यमेवास्ति। अस्य काव्यस्य नायकः एषः सुप्रसिद्धः विहारिदासनामको विरक्तः वैष्णवः साधुपुरूषोऽस्ति । **(९) नवमो ग्रन्थः** 'केलाकेलिकुतूहलमित्यस्ति । करोलीनगरे सुप्रतिष्ठितायाः भगवत्या केलादेव्याः चरितमस्मिन् खण्डकाव्ये विहितमस्ति ।**(१०)दशमो ग्रन्थः** 'श्री सर्वेश्वरशतकम्' इत्यस्ति । ग्रन्थोऽयमप्रकाशितोऽस्ति । स्तोत्रग्रन्थेऽस्मिन् भगवतः श्री-कृष्णचन्द्रस्य स्तुतिः विशेषरूपेण विहितास्ति ।**(११)एकादशो ग्रन्थः** राधापदपञ्चाशिका इत्यस्ति। स्तोत्रग्रन्थोऽयं भक्तिरसस्य सर्वोत्कृष्टं निदर्शनं कारयति ।**(१२) द्वादशो ग्रन्थः** 'प्रपत्तिपीयूषार्णवः इत्यस्ति । ग्रन्थेऽस्मिन् भक्तिरस्य लाक्षणिकं स्वरूपमभिव्यक्तमस्ति । **(१३)त्रयोदशो ग्रन्थः** 'माधुर्यशतकम्' इत्यस्ति शतकग्रन्थोऽयं युगलस्वरूपस्य श्रीराधासर्वेश्वरस्य स्तुतिं प्रस्तौति । **(१४)चतुर्दशो ग्रन्थः**'वैयाकरणसिद्धान्तसमीक्षा' इत्यस्ति व्याकणशास्त्रस्य ग्रन्थोऽयं स्थूलकायोऽस्ति साम्प्रतम् एवाऽयं ग्रन्थः प्रकाशितः, ग्रन्थेऽस्मिन् प्राच्यनव्यवैयाकरणानां सिद्धान्ताः समीक्षिताः सन्ति ।**(१५)पञ्चदशो ग्रन्थः** षोढ लिङ्गानुशासनमित्यस्ति ग्रन्थे-अस्मिन् लिङ्गानुशासने प्रथितानां पतञ्जलि,भर्तृहरि, कैयटादिशाब्दिकविदुषां मतानां समालोचनपुरस्सरं समीक्षा कृताऽस्ति।**(१६)षोडशो ग्रन्थः** 'प्रौढचिन्तनचन्द्रिका' इत्यस्ति ।**(१७) सप्तदशो ग्रन्थः**

'रामानुजाचार्यसम्प्रदायप्रसिद्धदर्शनतत्त्वानां तथा रामानन्दाचार्यसम्प्रदायप्रसिद्ध- दर्शनतत्त्वानां सूक्ष्मेक्षिकया तलस्पर्शी चिन्तनं विधाय उभयोर्मध्ये किं साम्यं किं च वैषम्यमिति तयोः पार्थक्यं विवेचितमस्ति । तत्र षोडशे ग्रन्थे प्रौढचिन्तनचन्द्रिकायां नाना स्त्रीयविषयविशिष्टचिन्तनात्मकाः नूतनपद्धतिप्रदर्शकाः सामायिकाश्च निबन्धा विलोक्यनो ग्रन्थोऽयं प्रमाणैरूपबृंहितो युक्तिभिश्च समन्दितोऽस्ति । अस्य ग्रन्थस्य 'लडाद्यन्ते भावनायाः अवाच्यत्वं वदतः' इत्यवतरणिकायाः अर्थविचारः इति शीर्षके निबन्धेऽस्मिन् वैयाकरणभूषणसारग्रन्थस्यास्याध्ययनाध्यापने काश्चन ज्ञाताज्ञातकारणजन्याः त्रुटयः सन्देहाः च समायाता भवन्ति अतः तान् सम्यगालोच्य विद्वद्भिः निरसनीयाः सन्तीति निदर्शितमस्ति । यथा इमां लेखविषयभूतामवतरणिकामेव पश्यामः अत्र 'प्राभाकरादीन् प्रति व्यवस्थापयति' इति यदुक्तं तन्न सम्यक् यतो हि व्यापारो भावना इत्यतः आरभ्य 'किञ्च क्रियावाचकतां विना धातुत्वमेव न इति अत्र करोतिभावयत्योः पर्यायत्वात् क्रिया भावनयोः व्यापाराभिन्नत्वं तिङ्वाच्यत्वञ्चेति भट्टमीमांसक-मतखण्डनपरत्वं गम्यते । अतः 'प्राभाकरादीन्' इत्यस्य स्थाने कौमारिलादीन् इति पाठपरिवर्तनमावश्यकम् इति प्रतिपादयन्ति लेखेऽस्मिन् शास्त्रिवर्याः । अथ 'लडाद्यन्ते' इत्यत्र आदिना फलमात्रं धात्वर्थः आत्म-निष्ठयत्नसहित दैहिकव्यापारमात्रस्य लिङर्थत्ववादि-मीमांसकग्रहो वक्तव्यः। प्रभाकारमते तु लिङ्लकारवाच्या आर्थीभावना ।

'लडाद्यन्ते' इत्यत्र प्रकरणानुशीलनेन तदगुणसंविज्ञानबहुव्रीहिपक्षस्यैव ज्यायस्त्वमिति शास्त्रिवर्यैः सुस्पष्टं प्रतिपादितमस्ति । लेखेऽस्मिन्तग्रे मीमांसकतेन भावनापदार्थोऽपि व्याख्यातः। यथा यागहोमदागादि-रूपो धर्मो 'यजेत' 'जुहुयात' 'दधात्' इत्यादिभिरव बोध्यते, प्रत्ययस्य दैरुप्यमस्ति , लिङ्त्वमाख्यातत्वश्च लङित्वेत रूपेण शाब्दी भावना , आख्यातत्वे च रूपेण आर्थीभावना अभिधीयते । धात्वर्थः करणं स्वर्गादिश्च फलम्। 'स्वर्गकामो यजेत' इत्यादेरयमर्थः-स्वर्गफलिका यागकरणिका यत्किंञ्चिदिति कर्तव्यताका शब्दभावनाविषयिणी भावना आर्थीभावनेति। इदश्च आर्थभावनाया मुख्यविशेष्यत्वम् अन्येषां कारकादीनां शब्दभावनायाश्च तत्रैव विशेषणत्वेनाऽन्वयो भवति नवीनमते । प्राचीनमते तु शब्दभावनाया हर मुख्यविशेष्यत्वमिति। तिङर्थो भावना । 'कृञ्चानुप्रयुज्यते लिटि' इति सूत्रस्य भाष्यमेवात्र मानम् । तेन द्वे रूपे धात्वर्थानाम् । पचति, यजति, गच्छति अत्र पाको, यागो, गमनमिति विशेषरूपं धातुवाच्यं सिद्धस्वमावमेकमपरञ्च सर्वधात्वर्थानुकूलं सामान्यरूपं तदाख्यातवाच्यम् सर्वत्र करोति प्रत्ययस्यानुवृत्तेः । एवं प्रकारेण लेखेऽस्मिन् भावनां निरूप्य नैयायिकोक्तकृतिविचारोऽपि संक्षेपेणोपन्यस्तः ।

अस्मिन्नेव ग्रन्थे 'भाषाविज्ञानशास्त्रस्य शास्त्रत्वपरीक्षा इति शीर्षकेन लिखितेऽपरस्मिन् षष्ठसंख्याके निबन्धे 'अपूर्वविषयबोधकत्वं शास्त्रत्वमिति' पाश्चात्यैः शाब्दशास्त्रज्ञैः स्वोपज्ञे भाषाविज्ञानशास्त्रे लक्षणमिदं संघटते नवेति विचारः पाण्डित्यपूर्णरीत्या लेखक- महानुभावैः पूज्यैः शास्त्रिवर्य्यैः कृतोऽस्ति। भाषाविज्ञानशास्त्रस्य विषयो भाषाविषयकं सर्वाङ्गीणं विशिष्टं ज्ञानमिति यद्युच्यते तर्हि अयं विषयः व्याकारणशास्त्र स्येति नाऽस्यापूर्वविषयबोधकत्वमतो नास्य शास्त्रत्वं सिध्यति। उपर्युक्ते विषये आग्रहे सति व्याकरविषयस्यानुवादमात्रत्वं भाषाविज्ञानस्य अतोऽस्य शास्त्रत्वहानिः स्पष्टैवास्ति। भाषाविषयकः सर्वाङ्गीणो विचारो व्याकरणशास्त्रस्यैव विषय इति भगवता पतञ्जलिना उक्तमस्ति।

परस्परं भावानामादानप्रदानरूपव्यवहारस्य असाधारणं कारणं वाक्यमतो वाक्यस्यैव भाषात्वं संगच्छते। 'वाक्यस्फोटोऽति निष्कर्षे तिष्ठतीति मत स्थितिः इत्यनया कारिकया वाक्यस्वैय भाषात्वं श्रीदीक्षित पादाः वदन्तिः । अत एव मानसभावाभिव्यञ्जको वाक्यस्फोटो भाषा' इति स्फोटवादिनो वैयाकरणः अन्ये तु उच्चरितवाक्यस्यैव भाषात्वमवगच्छन्ति।

शब्दः वाक्यम् भाषा, इत्येतेषु पर्यायित्वमस्ति अर्थान्तरता नास्ति । भाषायाः सर्वाङ्गीनो विचारस्तु व्याकरणविषयः भाषास्वरूपस्य व्यवहारस्य च व्याकरणशास्त्रविषयत्वं 'यो वा इमाम्' इति श्रुत्या सिद्धयति महाभाष्यानुसारं नामाख्यातोपसर्गनिपातेति चतुर्विधपदपरिमिता अर्थावगाहकोक्तपदसमूहरूपा वाक् भाषा तस्याश्चत्वारिरूपाणि परा-पश्यन्ती मध्यमा वैखरी संज्ञकानि, भाषयाः चतुर्थस्वरूपं वैखर्यात्मकं जनाः व्यवहरन्ति । स्फोटात्मिकां मध्यमाः युक्तयुञ्जानाः वदन्ति व्यवहरन्ति च । भाषायाः सर्वाङ्गीणं चिन्तनं भारतीयैः व्याकरणशास्त्राचार्य्यैः यादृक् कृतमस्ति न तादृक् पाश्चात्यभाषावैज्ञानिकैः बहुधा उक्तमस्ति तथापि तत्सर्वं न प्रामाणिकमिति दृष्ट्वा श्रीबदरिप्रसादशास्त्रिवर्य्यैः भाषोत्पत्तिविषयमपि सिद्धान्तं लेखेऽस्मिन् सुविशंद सप्रमाणं प्रतिपादितमस्ति । 'इन्द्रियमिन्द्रलिङ्गम -----इत्यादिपाणिनि सूत्रव्याख्यानमाध्यमेन भाषायाः नित्यत्वमभिव्यक्तत्वञ्च ऋषिसम्मतमिति प्रतिपाद्य भाषोत्पत्ति प्रश्नस्य प्रामाणिकं समाधानं प्रस्तुवन्ति । संसारे भाषावैविध्यन्तु स्थूलसूक्ष्मकारणशरीरजन्यं देशकालजन्यञ्चेति बोध्यम् ।

पाश्चात्यैः भाषाविज्ञानस्य ये विषयाः स्वीकृताः ते सर्वे हि व्याकरणशाष्त्रविषयाः सन्ति । एतावता भाषाविषयकविज्ञानस्य व्याकरणशास्त्रविषये सिद्धे पाश्चात्योपज्ञस्य भाषाविज्ञानस्य शास्त्रत्वं कथमपि न सिद्धयतीति निबन्धकतृणां मतमस्ति । अस्मिन् प्रौढचिन्तनचन्द्रिका-नामके ग्रन्थे अन्येऽपि शास्त्रीयाः निबन्धाः सन्ति । सोऽयं ग्रन्थः द्विसहस्राधिकनवमेऽब्दे जगद्गुरूरामानन्दाचार्यराजस्थान संस्कृतविश्वविद्यालयेन प्रकाशितः । 'शाब्दबोधसुधा' इति नामकोऽपरोऽपि ग्रन्थः शास्त्रिवर्यैः प्रजीतः यत्र शाब्दबोधप्रक्रिया प्रदर्शिताऽस्ति। अन्येऽपिशास्त्रीयनिबन्धाः एतैः प्रणीताः सन्ति । किन्तु विस्तारभयादत्रैव विरम्यते।